सर्पसत्रे समिद्धाग्नौ दह्यमानान् महोरगान् ।
दृष्ट्वेन्द्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥
अपश्यंस्तक्षकं तत्र राजा पारीक्षितो द्विजान् ।
उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥
तं गोपायति राजेन्द्र शक्रः शरणमागतम् ।
तेन संस्तम्भितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥
पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः ।
सहेन्द्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥
तच्छ्रुत्वा जुहुवुर्विप्राः सहेन्द्रं तक्षकं मखे ।
तक्षकाशु पतस्वेह सहेन्द्रेण मरुत्वता ॥
इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः ।
बभूव संभ्रान्तमतिः सविमानः सतक्षकः ॥
तं पतन्तं विमानेन सह तक्षकमम्बरात् ।
विलोक्याङ्गिरसः प्राह राजानं तं बृहस्पतिः ॥
नैष त्वया मनुष्येन्द्र वधमर्हति सर्पराट् ।
अनेन पीतममृतमथवा अजरामरः ॥
जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्म्मणा ।
राजंस्ततोऽन्यो नास्त्यस्य प्रदाता सुखदुःखयोः ।
सर्पचौराग्निवज्राम्बु क्षुत्तृड्व्याध्यादिभिर्नृप ।
पञ्चत्वमिच्छते जन्तुर्भुङ्क्त आरब्धकर्म्म तत् ॥
तस्मात् सत्रमिदं राजन् संस्थियेताभिचारिकम् ।
सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते ॥
इत्युक्तः स तथेत्याह महर्षेर्मानयन् वचः ।
सर्पसत्रादुपरतः पूजयामास वाक्पतिम् ॥”
(जरत्कारुपुत्रस्यास्तीकस्य वचनादेव जनमेजयः सर्पसत्रात् विरराममेति पुराणान्तरमतम् ॥)

सर्पसत्री, [न्] पुं, (सर्पसत्रमस्यास्तीति । इनिः ।) जनमेजयराजः । इति शब्दरत्नावली ॥

सर्पसहा, स्त्री, (सर्पं सहते इति । सह + अच् ।) सर्पकङ्कालीभेदः । इति रत्नमाला ॥

सर्पहा, [न्] पुं, (सर्पं हन्तीति । हन् + क्विप् ।) नकुलः । इति हेमचन्द्रः ॥

सर्पाक्षं, क्ली, (सर्पस्य अक्षीव अक्षं यस्य । अच् ।) रुद्राक्षम् । इति राजनिर्घण्टः ॥

सर्पाक्षी, स्त्री, (सर्पस्य अक्षीव पुष्पं यस्याः । अच् ङीप् ।) गन्धनाकुली । इति राजनिर्घण्टः ॥ क्षुपविशेषः । सहचरी इति गङ्गिनी इति च हिन्दि भाषा । तत्पर्य्यायः । गण्डाली २ नाडीकलापकः ३ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कृमिनाशित्वम् । वृश्चिकोन्दुरुसर्पाणां विषनाशित्वम् । व्रणरोपणत्वञ्च । इति भावप्रकाशः ॥

सर्पाख्यः, पुं, (सर्पस्य आख्या आख्या यस्य ।) महिषकन्दभेदः । इति राजनिर्घण्टः । नागकेशरः । इति रत्नमाला ॥ सर्पनामके, त्रि ॥

सर्पाङ्गी, स्त्री, (सर्पस्येव अङ्गं यस्याः । ङीष् ।) सर्पकङ्कालीभेदः । इति रत्नमाला ॥ सैंहली । इति राजनिर्घण्टः ॥

सर्पादनी, स्त्री, (सर्पस्य तद्विषस्य अदनं भक्षणं यस्याः । ङीप् ।) नाकुली । इति राजनिर्घण्टः ॥

सर्पारातिः, पुं, (सर्पस्य अरातिः ।) गरुड़ः । इति हेमचन्द्रः ॥

सर्पारिः, पुं, (सर्पस्य अरिः ।) नकुलः । इति राजनिर्घण्टः ॥ गरुड़श्च ॥ (यथा, हरिवंशे । ६८ । ३७ ।
“तं दृष्ट्वा पञ्चमूर्द्धानं सर्पं सर्पारिकेतनः ।
अक्रुद्ध एव भगवान् प्रत्युवाचोरगेश्वरम् ॥”)

सर्पावासं, क्ली, (सर्पस्य आवासो यत्र ।) चन्दनम् । इति राजनिर्घण्टः ॥ सर्पस्थाने, पुं ॥ (यथा, हरिवंशे । ६८ । २५ ।
“यशोदामनुगच्छन्त्यः सर्पावासमिमं ह्रदम् ।
प्रविशामो न यास्यामो विना दामोदरं व्रजम् ॥”)

सर्पाशनः, पुं, (सर्पमश्नातीति । अश + ल्युः ।) मयूरः । इति हलायुधः ॥ गरुड़श्च ॥

सर्पिः, [स्] क्ली, (सर्पतीति । सृप गतौ + “अर्चिशुचिहुसृपीति ।” उणा० २ । १०९ । इति इसिः ।) घृतम् । इत्यमरः । २ । ५२ ॥ (यथा, मनुः । ३ । २७४ ॥
“अपि नः स कुले जायात् यो नो दद्यात् त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥”
उदकम् । इति निघण्टुः । १ । १२ ॥)

सर्पिणी, स्त्री, (सर्पतीति । सृप् + णिनिः । ङीप् ।) सर्पभार्य्या । सापिनी इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।
“आशीराशी सर्पदंष्ट्रा तत्स्त्री सर्पी च सर्पिणी ॥”
क्षुद्रक्षुपभेदः । तत्पर्य्यायः । भुजगी २ भोगी ३ कुण्डली ४ पन्नगी ५ फणी ६ । तस्या गुणौ । विषघ्नत्वम् । कुचवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

सर्पी, स्त्री, (सर्प + जातौ ङीष् ।) सर्पिणी । इति शब्दरत्नावली ॥

सर्पी, [न्] त्रि, गमनकर्त्ता । सृपधातोर्णिन्प्रत्ययेन निष्पन्नः ॥ (यथा, किराते । ५ । ३५ ।
“स एष कैलास उपान्तसर्पिणः
करोत्यकालेऽस्तमयं विवस्वतः ॥”)

सर्पीष्टं, क्ली, (सर्पीणां सर्पभार्य्याणामिष्टम् ।) श्रीखण्डचन्दनम् । इति रत्नमाला ॥

सर्पेष्टं, क्ली, (सर्पाणामिष्टम् ।) श्रीखण्डचन्दनम् । इति जटाधरः ॥

सर्ब्ब, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) दन्त्यादिः । पान्तवर्गशेषोपधः । सर्ब्बति सिसर्ब्बयिषति । इति दुर्गादासः ॥

सर्व्वः, पुं, (सर्व्वस्मिन् सर्व्वतीति सर्व्व गतौ + पचाद्यच् । यद्वा, सृ गतौ + “सर्व्वनिघृष्वेति ।” उणा० १ । १५३ । इति वन्प्रत्ययेन साधुः ।) शिवः । इत्यमरः । १ । १ । ३२ ॥ क्षितिमूर्त्तिरयम् । यथा, विसर्जनात् पूर्वं भविष्यपुराणोक्तं स्वभावसिद्धप्राच्यैशान्यादिदिक्षु वामावर्त्तेन पूजनम् । यथा, सर्व्वाय क्षितिमूर्त्तये नम इत्यादि तिथ्यादितत्त्वम् ॥ विष्णुः । यथा,—
“असतश्च सतश्चैव सर्व्वस्य प्रभवाप्ययात् ।
सर्व्वस्य सर्व्वदा ज्ञानात् सर्व्वमेतं प्रचक्षते ॥”
इति विष्णुपुराणम् ॥
विष्णुसहस्रनामस्तोत्रेऽप्येवमेव ॥

सर्व्वः, त्रि, (सृ + वन् ।) सम्पूर्णः । इत्यमरः । ३ । १ । ६४ ॥ अस्य पर्य्यायः सकलशब्दे द्रष्टव्यः । प्रयोगो यथा,—
“सर्व्वरत्नमयो मेरुः सर्व्वाश्चर्य्यमयं नभः ।
सर्व्वतीर्थमयी गङ्गा सर्व्वदेवमयो हरिः ॥”
इति वह्निपुराणे देवाम्बरीषसंवादे २ अध्यायः ॥

सर्व्वसहा, स्त्री, (सर्व्वं सहते इति । सह + “पूःसर्व्वयोर्दारिसहोः ।” ३ । २ । ४१ । इति खच् । अरुर्द्विषदिति मुम् ।) पृथिवी । इत्यमरः । २ । १ । ३ ॥ (यथा आर्य्यासप्तशत्याम् । १३८ ।
“ऊढ़ामुनातिबाहय पृष्ठे लग्नापि कालमचलापि ।
सर्व्वंसहे कठोरत्वचः किमङ्ग न कमठस्य ॥”
राशि, पुं, । इति काशिका ॥ सर्व्वक्लेशादिसहे, त्रि, । यथा, साहित्यदर्पणे । २ । २० ।
“कामं सन्तु दृढ़ं कठोरहृदयो रामोऽस्मि सर्व्वंसहो
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥”)

सर्व्वकः, त्रि, सकलः । सर्व्वशब्दस्य टेः पूर्व्वमकितस्मात् स्वार्थे के च निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

सर्व्वकर्त्ता, [ऋ] पुं, (सर्वेषां कर्त्ता ।) ब्रह्मा । इति शब्दरत्नावली ॥

सर्व्वकर्म्मीणः, त्रि, (सर्व्वकर्म्माणि व्याप्नोतीति । सर्व्वकर्म्म + “तत्सर्व्वादेः पथ्यङ्गकर्म्मपत्रपात्रं व्याप्नोति ।” ५ । २ । ७ । इति खः ।) सकलकर्म्मकर्त्ता । यथा, भट्टौ ५ सर्गे ।
“संग्रामे सर्व्वकर्म्मीणौ बाहू यस्योपजानुकौ ॥”

सर्व्वके, व्य, सर्व्वत्र । सर्व्वशब्दात् अकच्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

सर्व्वकेशी [न्] पुं, (सर्व्वकेशोऽस्यास्तीति । सर्व्वकेश + “सर्व्वादेश्चेति वक्तव्यम् ।” ५ । २ । १३५ । इत्यस्य वार्त्तिकोक्त्या इनिः ।) नटः । इति शब्दरत्नावली ॥

सर्व्वक्षारः, पुं, (सर्व्वेषां क्षारः ।) क्षारभेदः । सावान् इति भाषा । इति केचित् ॥ तत्पर्य्यायः । बहुक्षारः २ समूहक्षारकः ३ स्तोमक्षारः ४ महाक्षारः ५ मलारिः ६ क्षारमेलकः ७ । अस्य गुणाः । अतिक्षारत्वम् । चक्षुष्यत्वम् । वस्तिशोधनत्वम् । उदावर्त्तक्रिमिनाशित्वम् । मलवस्त्रविशोधनत्वञ्च । इति राजनिर्घण्टः ॥

सर्व्वगं, क्ली, (सर्व्वं गच्छतीति । गम + “अन्यात्यन्ताध्वेति ।” ३ । २ । ४८ । इति डः ।) जलम् । इति मेदिनी ॥

सर्व्वगः, पुं, (सर्व्वं गच्छतीति । गम + डः ।) शिवः । (यथा, महाभारते । १३ । १७ । १०४ ।
“प्रभावः सर्व्वगो वायुरर्य्यमा सविता रविः ॥”)
ब्रह्मा । इति मेदिनी ॥ आत्मा । इति शब्द-